# Shri Sharada Sahasranama Stotram

# શ્રીશારદાસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : shAradAsahasranAmastotram

File name : shAradAsahasranAmastotra.itx

Category : sahasranAma, devii, sarasvatI, devI

Location : doc_devii

Transliterated by : NA

Proofread by : PSA Easwaran

Description-comments : See corresopnding nAmAvalI

Latest update : October 18, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 11, 2023

*sanskritdocuments.org*

# શ્રીશારદાસહસ્રનામસ્તોત્રમ્

શ્રી ગણેશાય નમઃ ।

શ્રીભૈરવી ઉવાચ
ભગવન્ સર્વધર્મજ્ઞ સર્વલોકનમસ્કૃત ।
સર્વાગમૈકતત્ત્વજ્ઞ તત્ત્વસાગરપારગ ॥ ૧॥

કૃપાપરોઽસિ દેવેશ શરણાગતવત્સલ ।
પુરા દત્તં વરં મહ્યં દેવદાનવસઙ્ગરે ॥ ૨॥

તમદ્ય ભગવંસ્ત્વત્તો યાચેઽહં પરમેશ્વર ।
પ્રયચ્છ ત્વરિતં શમ્ભો યદ્યહં પ્રેયસી તવ ॥ ૩॥

શ્રીભૈરવ ઉવાચ
દેવદેવી પુરા સત્યં સુરાસુરરણાજિરે ।
વરો દત્તો મયા તેઽદ્ય વરં યાચસ્વ વાઞ્છિતમ્ ॥ ૪॥

શ્રીભૈરવી ઉવાચ
ભગવન્ યા મહાદેવી શારદાઽઽખ્યા સરસ્વતી ।
કાશ્મીરે સા સ્વતપસા શાણ્ડિલ્યેનાવતારિતા ॥ ૫॥

તસ્યા નામસહસ્રં મે ભોગમોક્ષૈકસાધનમ્ ।
સાધકાનાં હિતાર્થાય વદ ત્વં પરમેશ્વર ॥ ૬॥

શ્રીભૈરવ ઉવાચ
રહસ્યમેતદખિલં દેવાનાં પરમેશ્વરિ ।
પરાપરરહસ્યં ચ જગતાં ભુવનેશ્વરિ ॥ ૭॥

યા દેવી શારદાખ્યેતિ જગન્માતા સરસ્વતી ।
પઞ્ચાક્ષરી ચ ષટ્કૂટત્રૈલોક્યપ્રથિતા સદા ॥ ૮॥

તયા તતમિદં વિશ્વં તયા સમ્પાલ્યતે જગત્ ।

સૈવ સંહરતે ચાન્તે સૈવ મુક્તિપ્રદાયિની ॥ ૯॥

દેવદેવી મહાવિદ્યા પરતત્ત્વૈકરૂપિણી ।
તસ્યા નામસહસ્રં તે વક્ષ્યેઽહં ભક્તિસાધનમ્ ॥ ૧૦॥

॥ વિનિયોગઃ ॥

ૐ અસ્ય શ્રીશારદાભગવતીસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય
શ્રીભગવાન્ ભૈરવ ઋષિઃ । ત્રિષ્ટુપ્ છન્દઃ। પઞ્ચાક્ષરશારદા દેવતા।
ક્લીં બીજમ્ । હ્રીં શક્તિઃ। નમ ઇતિ કીલકમ્।
ત્રિવર્ગફલસિદ્ધ્યર્થે સહસ્રનામપાઠે વિનિયોગઃ ॥

॥ કરન્યાસઃ ॥

ૐ હ્રાં ક્લાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હ્રીં ક્લીં તર્જનીભ્યાં નમઃ ।
ૐ હ્રૂં ક્લૂં મધ્યમાભ્યાં નમઃ ।
ૐ હ્રૈં ક્લૈં અનામિકાભ્યાં નમઃ।
ૐ હ્રૌં ક્લૌં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ હ્રઃ ક્લઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

॥ હૃદયાદિ ન્યાસઃ ॥

ૐ હ્રાં ક્લાં હૃદયાય નમઃ ।
ૐ હ્રીં ક્લીં શિરસે સ્વાહા ।
ૐ હ્રૂં ક્લૂં શિખાયૈ વષટ્ ।
ૐ હ્રૈં ક્લૈં કવચાય હું ।
ૐ હ્રૌં ક્લૌં નેત્રત્રયાય વૌષટ્ ।
ૐ હ્રઃ ક્લઃ અસ્ત્રાય ફટ ।
ૐ ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ॥

॥ ધ્યાનમ્ ॥

શક્તિચાપશરઘણ્ટિકાસુધાપાત્રરત્નકલશોલ્લસત્કરામ્ ।
પૂર્ણચન્દ્રવદનાં ત્રિલોચનાં શારદાં નમત સર્વસિદ્ધિદામ્ ॥

શ્રી શ્રીશૈલસ્થિતા યા પ્રહસિતવદના પાર્વતી શૂલહસ્તા
વહ્ન્યર્કેન્દુત્રિનેત્રા ત્રિભુવનજનની ષડ્ભુજા સર્વશક્તિઃ ।
શાણ્ડિલ્યેનોપનીતા જયતિ ભગવતી ભક્તિગમ્યા નતાનાં

સા નઃ સિંહાસનસ્થા હ્યભિમતફલદા શારદા શં કરોતુ ॥

॥ પઞ્ચપૂજા ॥

લં પૃથિવ્યાત્મિકાયૈ શ્રીશારદાદેવ્યૈ ગન્ધં સમર્પયામિ ।
હં આકાશાત્મિકાયૈ શ્રીશારદાદેવ્યૈ પુષ્પૈઃ પૂજયામિ ।
યં વાય્વાત્મિકાયૈ શ્રીશારદાદેવ્યૈ ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મિકાયૈ શ્રીશારદાદેવ્યૈ દીપં દર્શયામિ ।
વં અમૃતાત્મિકાયૈ શ્રીશારદાદેવ્યૈ અમૃતમ્મહાનૈવેદ્યં નિવેદયામિ ।
સં સર્વાત્મિકાયૈ શ્રીશારદાદેવ્યૈ સર્વોપચારપૂજાં સમર્પયામિ ॥

યોનિમુદ્રાં દર્શયેત્ ॥

॥ શ્રીશારદા ગાયત્રી ॥

ૐ શારદાયૈ વિદ્મહે । વરદાયૈ ધીમહિ।
તન્નો મોક્ષદાયિની પ્રચોદયાત્ ॥

શ્રીશારદાસહસ્રનામસ્તોત્રમ્ ॥

શ્રી ગણેશાય નમઃ ।

શ્રીભૈરવી ઉવાચ
ભગવન્ સર્વધર્મજ્ઞ સર્વલોકનમસ્કૃત ।
સર્વાગમૈકતત્ત્વજ્ઞ તત્ત્વસાગરપારગ ॥ ૧॥

કૃપાપરોઽસિ દેવેશ શરણાગતવત્સલ ।
પુરા દત્તં વરં મહ્યં દેવદાનવસઙ્ગરે ॥ ૨॥

તમદ્ય ભગવંસ્ત્વત્તો યાચેઽહં પરમેશ્વર ।
પ્રયચ્છ ત્વરિતં શમ્ભો યદ્યહં પ્રેયસી તવ ॥ ૩॥

શ્રીભૈરવ ઉવાચ
દેવદેવી પુરા સત્યં સુરાસુરરણાજિરે ।
વરો દત્તો મયા તેઽદ્ય વરં યાચસ્વ વાઞ્છિતમ્ ॥ ૪॥

શ્રીભૈરવી ઉવાચ
ભગવન્ યા મહાદેવી શારદાઽઽખ્યા સરસ્વતી ।
કાશ્મીરે સા સ્વતપસા શાણ્ડિલ્યેનાવતારિતા ॥ ૫॥

તસ્યા નામસહસ્રં મે ભોગમોક્ષૈકસાધનમ્ ।

સાધકાનાં હિતાર્થાય વદ ત્વં પરમેશ્વર ॥ ૬॥

શ્રીભૈરવ ઉવાચ
રહસ્યમેતદખિલં દેવાનાં પરમેશ્વરિ ।
પરાપરરહસ્યં ચ જગતાં ભુવનેશ્વરિ ॥ ૭॥

યા દેવી શારદાખ્યેતિ જગન્માતા સરસ્વતી ।
પઞ્ચાક્ષરી ચ ષટ્કૂટત્રૈલોક્યપ્રથિતા સદા ॥ ૮॥

તયા તતમિદં વિશ્વં તયા સમ્પાલ્યતે જગત્ ।
સૈવ સંહરતે ચાન્તે સૈવ મુક્તિપ્રદાયિની ॥ ૯॥

દેવદેવી મહાવિદ્યા પરતત્ત્વૈકરૂપિણી ।
તસ્યા નામસહસ્રં તે વક્ષ્યેઽહં ભક્તિસાધનમ્ ॥ ૧૦॥

॥ વિનિયોગઃ ॥

ૐ અસ્ય શ્રીશારદાભગવતીસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય
શ્રીભગવાન્ ભૈરવ ઋષિઃ । ત્રિષ્ટુપ્ છન્દઃ। પઞ્ચાક્ષરશારદા દેવતા।
ક્લીં બીજમ્ । હ્રીં શક્તિઃ। નમ ઇતિ કીલકમ્।
ત્રિવર્ગફલસિદ્ધ્યર્થે સહસ્રનામપાઠે વિનિયોગઃ ॥

॥ કરન્યાસઃ ॥

ૐ હ્રાં ક્લાં અઙ્ગુષ્ઠાભ્યાં નમઃ । ૐ હ્રીં ક્લીં તર્જનીભ્યાં નમઃ।
ૐ હ્રૂં ક્લૂં મધ્યમાભ્યાં નમઃ । ૐ હ્રૈં ક્લૈં અનામિકાભ્યાં નમઃ।
ૐ હ્રૌં ક્લૌં કનિષ્ઠિકાભ્યાં નમઃ । ૐ હ્રઃ ક્લઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ॥

॥ હૃદયાદિ ન્યાસઃ ॥

ૐ હ્રાં ક્લાં હૃદયાય નમઃ । ૐ હ્રીં ક્લીં શિરસે સ્વાહા।
ૐ હ્રૂં ક્લૂં શિખાયૈ વષટ્ । ૐ હ્રૈં ક્લૈં કવચાય હુમ્।
ૐ હ્રૌં ક્લૌં નેત્રત્રયાય વૌષટ્ । ૐ હ્રઃ ક્લઃ અસ્ત્રાય ફટ।
ૐ ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ॥

॥ ધ્યાનમ્ ॥

શક્તિચાપશરઘણ્ટિકાસુધાપાત્રરત્નકલશોલ્લસત્કરામ્ ।
પૂર્ણચન્દ્રવદનાં ત્રિલોચનાં શારદાં નમત સર્વસિદ્ધિદામ્ ॥

શ્રી શ્રીશૈલસ્થિતા યા પ્રહસિતવદના પાર્વતી શૂલહસ્તા

વહ્ન્યર્કેન્દુત્રિનેત્રા ત્રિભુવનજનની ષડ્ભુજા સર્વશક્તિઃ ।
શાણ્ડિલ્યેનોપનીતા જયતિ ભગવતી ભક્તિગમ્યા નતાનાં
સા નઃ સિંહાસનસ્થા હ્યભિમતફલદા શારદા શં કરોતુ ॥

॥ પઞ્ચપૂજા ॥

લં પૃથિવ્યાત્મિકાયૈ શ્રીશારદાદેવ્યૈ ગન્ધં સમર્પયામિ ।
હં આકાશાત્મિકાયૈ શ્રીશારદાદેવ્યૈ પુષ્પૈઃ પૂજયામિ ।
યં વાય્વાત્મિકાયૈ શ્રીશારદાદેવ્યૈ ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મિકાયૈ શ્રીશારદાદેવ્યૈ દીપં દર્શયામિ ।
વં અમૃતાત્મિકાયૈ શ્રીશારદાદેવ્યૈ અમૃતમ્મહાનૈવેદ્યં નિવેદયામિ ।
સં સર્વાત્મિકાયૈ શ્રીશારદાદેવ્યૈ સર્વોપચારપૂજાં સમર્પયામિ ॥

યોનિમુદ્રાં દર્શયેત્ ॥

॥ શ્રીશારદા ગાયત્રી ॥

ૐ શારદાયૈ વિદ્મહે । વરદાયૈ ધીમહિ।
તન્નો મોક્ષદાયિની પ્રચોદયાત્ ॥

॥ શ્રીશારદા મન્ત્રઃ ॥

ૐ હ્રીં ક્લીં શારદાયૈ નમઃ ॥

॥ અથ શ્રીશારદાસહસ્રનામસ્તોત્રમ્ ॥

ૐ હ્રીં ક્લીં શારદા શાન્તા શ્રીમતી શ્રીશુભઙ્કરી ।
શુભા શાન્તા શરદ્બીજા શ્યામિકા શ્યામકુન્તલા ॥ ૧॥

શોભાવતી શશાઙ્કેશી શાતકુમ્ભપ્રકાશિની ।
પ્રતાપ્યા તાપિની તાપ્યા શીતલા શેષશાયિની ॥ ૨॥

શ્યામા શાન્તિકરી શાન્તિઃ શ્રીકરી વીરસૂદિની ।
વેશ્યા વેશ્યકરી વૈશ્યા વાનરી વેષભાન્વિતા ॥ ૩॥

વાચાલી શુભગા શોભ્યા શોભના ચ શુચિસ્મિતા ।
જગન્માતા જગદ્ધાત્રી જગત્પાલનકારિણી ॥ ૪॥

હારિણી ગદિની ગોધા ગોમતી જગદાશ્રયા ।
સૌમ્યા યામ્યા તથા કામ્યા વામ્યા વાચામગોચરા ॥ ૫॥

ઐન્દ્રી ચાન્દ્રી કલા કાન્તા શશિમણ્ડલમધ્યગા ।
આગ્નેયી વારુણી વાણી કારુણા કરુણાશ્રયા ॥ ૬॥

નૈરૃતી ઋતરૂપા ચ વાયવી વાગ્ભવોદ્ભવા ।
કૌબેરી કૂબરા કોલા કામેશી કામસુન્દરી ॥ ૭॥

ખેશાની કેશનીકારા મોચની ધેનુકામદા ।
કામધેનુઃ કપાલેશી કપાલકરસંયુતા ॥ ૮॥

ચામુણ્ડા મૂલ્યદા મૂર્તિર્મુણ્ડમાલાવિભૂષણા ।
સુમેરુતનયા વન્દ્યા ચણ્ડિકા ચણ્ડસૂદિની ॥ ૯॥

ચણ્ડાંશુતેજસામ્મૂર્તિશ્ચણ્ડેશી ચણ્ડવિક્રમા ।
ચાટુકા ચાટકી ચર્ચા ચારુહંસા ચમત્કૃતિઃ ॥ ૧૦॥

લલજ્જિહ્વા સરોજાક્ષી મુણ્ડસૃઙ્મુણ્ડધારિણી ।
સર્વાનન્દમયી સ્તુત્યા સકલાનન્દવર્ધિની ॥ ૧૧॥

ધૃતિઃ કૃતિઃ સ્થિતિર્મૂર્તિઃ દ્યૌવાસા ચારુહાસિની ।
રુક્માઙ્ગદા રુક્મવર્ણા રુક્મિણી રુક્મભૂષણા ॥ ૧૨॥

કામદા મોક્ષદાનન્દા નારસિંહી નૃપાત્મજા ।
નારાયણી નરોત્તુઙ્ગનાગિની નગનન્દિની ॥ ૧૩॥

નાગશ્રીર્ગિરિજા ગુહ્યા ગુહ્યકેશી ગરીયસી ।
ગુણાશ્રયા ગુણાતીતા ગજરાજોપરિસ્થિતા ॥ ૧૪॥

ગજાકારા ગણેશાની ગન્ધર્વગણસેવિતા ।
દીર્ઘકેશી સુકેશી ચ પિઙ્ગલા પિઙ્ગલાલકા ॥ ૧૫॥

ભયદા ભવમાન્યા ચ ભવાની ભવતોષિતા ।
ભવાલસ્યા ભદ્રધાત્રી ભીરુણ્ડા ભગમાલિની ॥ ૧૬॥

પૌરન્દરી પરઞ્જ્યોતિઃ પુરન્દરસમર્ચિતા ।
પીના કીર્તિકરી કીર્તિઃ કેયૂરાઢ્યા મહાકચા ॥ ૧૭॥

ઘોરરૂપા મહેશાની કોમલા કોમલાલકા ।
કલ્યાણી કામના કુબ્જા કનકાઙ્ગદભૂષિતા ॥ ૧૮॥

કેનાશી વરદા કાલી મહામેધા મહોત્સવા ।
વિરૂપા વિશ્વરૂપા ચ વિશ્વધાત્રી પિલમ્પિલા ॥ ૧૯॥

પદ્માવતી મહાપુણ્યા પુણ્યા પુણ્યજનેશ્વરી ।
જહ્નુકન્યા મનોજ્ઞા ચ માનસી મનુપૂજિતા ॥ ૨૦॥

કામરૂપા કામકલા કમનીયા કલાવતી ।
વૈકુણ્ઠપત્ની કમલા શિવપત્ની ચ પાર્વતી ॥ ૨૧॥

કામ્યશ્રીર્ગારુડીવિદ્યા વિશ્વસૂર્વીરસૂર્દિતિઃ ।
માહેશ્વરી વૈષ્ણવી ચ બ્રાહ્મી બ્રાહ્મણપૂજિતા ॥ ૨૨॥

માન્યા માનવતી ધન્યા ધનદા ધનદેશ્વરી ।
અપર્ણા પર્ણશિથિલા પર્ણશાલાપરમ્પરા ॥ ૨૩॥

પદ્માક્ષી નીલવસ્ત્રા ચ નિમ્ના નીલપતાકિની ।
દયાવતી દયાધીરા ધૈર્યભૂષણભૂષિતા ॥ ૨૪॥

જલેશ્વરી મલ્લહન્ત્રી ભલ્લહસ્તા મલાપહા ।
કૌમુદી ચૈવ કૌમારી કુમારી કુમુદાકરા ॥ ૨૫॥

પદ્મિની પદ્મનયના કુલજા કુલકૌલિની ।
કરાલા વિકરાલાક્ષી વિસ્રમ્ભા દર્દુરાકૃતિઃ ॥ ૨૬॥

વનદુર્ગા સદાચારા સદાશાન્તા સદાશિવા ।
સૃષ્ટિઃ સૃષ્ટિકરી સાધ્વી માનુષી દેવકી દ્યુતિઃ ॥ ૨૭॥

વસુધા વાસવી વેણુઃ વારાહી ચાપરાજિતા ।
રોહિણી રમણા રામા મોહિની મધુરાકૃતિઃ ॥ ૨૮॥

શિવશક્તિઃ પરાશક્તિઃ શાઙ્કરી ટઙ્કધારિણી ।
ક્રૂરકઙ્કાલમાલાઢ્યા લઙ્કાકઙ્કણભૂષિતા ॥ ૨૯॥

દૈત્યાપહરા દીપ્તા દાસોજ્જ્વલકુચાગ્રણીઃ ।
ક્ષાન્તિઃ ક્ષૌમઙ્કરી બુદ્ધિર્બોધાચારપરાયણા ॥ ૩૦॥

શ્રીવિદ્યા ભૈરવીવિદ્યા ભારતી ભયઘાતિની ।
ભીમા ભીમારવા ભૈમી ભઙ્ગુરા ક્ષણભઙ્ગુરા ॥ ૩૧॥

જિત્યા પિનાકભૃત્ સૈન્યા શઙ્ખિની શઙ્ખરૂપિણી ।
દેવાઙ્ગના દેવમાન્યા દૈત્યસૂર્દૈત્યમર્દિની ॥ ૩૨॥

દેવકન્યા ચ પૌલોમી રતિઃ સુન્દરદોસ્તટી ।

સુખિની શૌકિની શૌક્લી સર્વસૌખ્યવિવર્ધિની ॥ ૩૩॥

લોલા લીલાવતી સૂક્ષ્મા સૂક્ષ્માઽસૂક્ષ્મગતિર્મતિઃ ।
વરેણ્યા વરદા વેણી શરણ્યા શરચાપિની ॥ ૩૪॥

ઉગ્રકાલી મહાકાલી મહાકાલસમર્ચિતા ।
જ્ઞાનદા યોગિધ્યેયા ચ ગોવલ્લી યોગવર્ધિની ॥ ૩૫॥

પેશલા મધુરા માયા વિષ્ણુમાયા મહોજ્જ્વલા ।
વારાણસી તથાઽવન્તી કાઞ્ચી કુક્કુરક્ષેત્રસુઃ ॥ ૩૬॥

અયોધ્યા યોગસૂત્રાઘા યાદવેશી યદુપ્રિયા ।
યમહન્ત્રી ચ યમદા યમિની યોગવર્તિની ॥ ૩૭॥

ભસ્મોજ્જ્વલા ભસ્મશય્યા ભસ્મકાલીસમર્ચિતા ।
ચન્દ્રિકા શૂલિની શિલ્યા પ્રાશિની ચન્દ્રવાસિની ॥ ૩૮॥

પદ્મહસ્તા ચ પીના ચ પાશિની પાશમોચની ।
સુધાકલશહસ્તા ચ સુધામૂર્તિઃ સુધામયી ॥ ૩૯॥

વ્યૂહાયુધા વરારોહા વરધાત્રી વરોત્તમા ।
પાપાશના મહામૂર્તા મોહદા મધુરસ્વરા ॥ ૪૦॥

મધુપા માધવી માલ્યા મલ્લિકા કાલિકા મૃગી ।
મૃગાક્ષી મૃગરાજસ્થા કેશિકીનાશઘાતિની ॥ ૪૧॥

રક્તામ્બરધરા રાત્રિઃ સુકેશી સુરનાયિકા ।
સૌરભી સુરભિઃ સૂક્ષ્મા સ્વયમ્ભૂકુસુમાર્ચિતા ॥ ૪૨॥

અમ્બા જૃમ્ભા જટાભૂષા જૂટિની જટિની નટી ।
મર્માનન્દદા જ્યેષ્ઠા શ્રેષ્ઠા કામેષ્ટવર્દ્ધિની ॥ ૪૩॥

રૌદ્રી રુદ્રસ્તના રુદ્રા શતરુદ્રા ચ શામ્ભવી ।
શ્રવિષ્ઠા શિતિકણ્ઠેશી વિમલાનન્દવર્ધિની ॥ ૪૪॥

કપર્દિની કલ્પલતા મહાપ્રલયકારિણી ।
મહાકલ્પાન્તસંહૃષ્ટા મહાકલ્પક્ષયઙ્કરી ॥ ૪૫॥

સંવર્તાગ્નિપ્રભા સેવ્યા સાનન્દાઽઽનન્દવર્ધિની ।
સુરસેના ચ મારેશી સુરાક્ષી વિવરોત્સુકા ॥ ૪૬॥

પ્રાણેશ્વરી પવિત્રા ચ પાવની લોકપાવની ।
લોકધાત્રી મહાશુક્લા શિશિરાચલકન્યકા ॥ ૪૭॥

તમોઘ્ની ધ્વાન્તસંહર્ત્રી યશોદા ચ યશસ્વિની ।
પ્રદ્યોતિની ચ દ્યુમતી ધીમતી લોકચર્ચિતા ॥ ૪૮॥

પ્રણવેશી પરગતિઃ પારાવારસુતા સમા ।
ડાકિની શાકિની રુદ્ધા નીલા નાગાઙ્ગના નુતિઃ ॥ ૪૯॥

કુન્દદ્યુતિશ્ચ કુરટા કાન્તિદા ભ્રાન્તિદા ભ્રમા ।
ચર્વિતાચર્વિતા ગોષ્ઠી ગજાનનસમર્ચિતા ॥ ૫૦॥

ખગેશ્વરી ખનીલા ચ નાગિની ખગવાહિની ।
ચન્દ્રાનના મહારુણ્ડા મહોગ્રા મીનકન્યકા ॥ ૫૧॥

માનપ્રદા મહારૂપા મહામાહેશ્વરીપ્રિયા ।
મરુદ્ગણા મહદ્વક્ત્રા મહોરગા ભયાનકા ॥ ૫૨॥

મહાઘોણા કરેશાની માર્જારી મન્મથોજ્જ્વલા ।
કર્ત્રી હન્ત્રી પાલયિત્રી ચણ્ડમુણ્ડનિષૂદિની ॥ ૫૩॥

નિર્મલા ભાસ્વતી ભીમા ભદ્રિકા ભીમવિક્રમા ।
ગઙ્ગા ચન્દ્રાવતી દિવ્યા ગોમતી યમુના નદી ॥ ૫૪॥

વિપાશા સરયૂસ્તાપી વિતસ્તા કુઙ્કુમાર્ચિતા ।
ગણ્ડકી નર્મદા ગૌરી ચન્દ્રભાગા સરસ્વતી ॥ ૫૫॥

ઐરાવતી ચ કાવેરી શતાહ્વા ચ શતહ્રદા ।
શ્વેતવાહનસેવ્યા ચ શ્વેતાસ્યા સ્મિતભાવિની ॥ ૫૬॥

કૌશામ્બી કોશદા કોશ્યા કાશ્મીરકનકેલિની ।
કોમલા ચ વિદેહા ચ પૂઃ પુરી પુરસૂદિની ॥ ૫૭॥

પૌરૂરવા પલાપાલી પીવરાઙ્ગી ગુરુપ્રિયા ।
પુરારિગૃહિણી પૂર્ણા પૂર્ણરૂપા રજસ્વલા ॥ ૫૮॥

સમ્પૂર્ણચન્દ્રવદના બાલચન્દ્રસમદ્યુતિઃ ।
રેવતી પ્રેયસી રેવા ચિત્રા ચિત્રામ્બરા ચમૂઃ ॥ ૫૯॥

નવપુષ્પસમુદ્ભૂતા નવપુષ્પૈકહારિણી ।
નવપુષ્પશુભામાલા નવપુષ્પકુલાનના ॥ ૬૦॥

નવપુષ્પોદ્ભવપ્રીતા નવપુષ્પસમાશ્રયા ।
નવપુષ્પલલત્કેશા નવપુષ્પલલન્મુખા ॥ ૬૧॥

નવપુષ્પલલત્કર્ણા નવપુષ્પલલત્કટિઃ ।
નવપુષ્પલલન્નેત્રા નવપુષ્પલલન્નસા ॥ ૬૨॥

નવપુષ્પસમાકારા નવપુષ્પલલદ્ભુજા ।
નવપુષ્પલલત્કણ્ઠા નવપુષ્પાર્ચિતસ્તની ॥ ૬૩॥

નવપુષ્પલલન્મધ્યા નવપુષ્પકુલાલકા ।
નવપુષ્પલલન્નાભિઃ નવપુષ્પલલત્ભગા ॥ ૬૪॥

નવપુષ્પલલત્પાદા નવપુષ્પકુલાઙ્ગની ।
નવપુષ્પગુણોત્પીઠા નવપુષ્પોપશોભિતા ॥ ૬૫॥

નવપુષ્પપ્રિયોપેતા પ્રેતમણ્ડલમધ્યગા ।
પ્રેતાસના પ્રેતગતિઃ પ્રેતકુણ્ડલભૂષિતા ॥ ૬૬॥

પ્રેતબાહુકરા પ્રેતશય્યા શયનશાયિની ।
કુલાચારા કુલેશાની કુલકા કુલકૌલિની ॥ ૬૭॥

સ્મશાનભૈરવી કાલભૈરવી શિવભૈરવી ।
સ્વયમ્ભૂભૈરવી વિષ્ણુભૈરવી સુરભૈરવી ॥ ૬૮॥

કુમારભૈરવી બાલભૈરવી રુરુભૈરવી ।
શશાઙ્કભૈરવી સૂર્યભૈરવી વહ્નિભૈરવી ॥ ૬૯॥

શોભાદિભૈરવી માયાભૈરવી લોકભૈરવી ।
મહોગ્રભૈરવી સાધ્વીભૈરવી મૃતભૈરવી ॥ ૭૦॥

સમ્મોહભૈરવી શબ્દભૈરવી રસભૈરવી ।
સમસ્તભૈરવી દેવી ભૈરવી મન્ત્રભૈરવી ॥ ૭૧॥

સુન્દરાઙ્ગી મનોહન્ત્રી મહાશ્મશાનસુન્દરી ।
સુરેશસુન્દરી દેવસુન્દરી લોકસુન્દરી ॥ ૭૨॥

ત્રૈલોક્યસુન્દરી બ્રહ્મસુન્દરી વિષ્ણુસુન્દરી ।
ગિરીશસુન્દરી કામસુન્દરી ગુણસુન્દરી ॥ ૭૩॥

આનન્દસુન્દરી વક્ત્રસુન્દરી ચન્દ્રસુન્દરી ।

આદિત્યસુન્દરી વીરસુન્દરી વહ્નિસુન્દરી ॥ ૭૪॥

પદ્માક્ષસુન્દરી પદ્મસુન્દરી પુષ્પસુન્દરી ।
ગુણદાસુન્દરી દેવી સુન્દરી પુરસુન્દરી ॥ ૭૫॥

મહેશસુન્દરી દેવી મહાત્રિપુરસુન્દરી ।
સ્વયમ્ભૂસુન્દરી દેવી સ્વયમ્ભૂપુષ્પસુન્દરી ॥ ૭૬॥

શુક્રૈકસુન્દરી લિઙ્ગસુન્દરી ભગસુન્દરી ।
વિશ્વેશસુન્દરી વિદ્યાસુન્દરી કાલસુન્દરી ॥ ૭૭॥

શુક્રેશ્વરી મહાશુક્રા શુક્રતર્પણતર્પિતા ।
શુક્રોદ્ભવા શુક્રરસા શુક્રપૂજનતોષિતા ॥ ૭૮॥

શુક્રાત્મિકા શુક્રકરી શુક્રસ્નેહા ચ શુક્રિણી ।
શુક્રસેવ્યા શુક્રસુરા શુક્રલિપ્તા મનોન્મના ॥ ૭૯॥

શુક્રહારા સદાશુક્રા શુક્રરૂપા ચ શુક્રજા ।
શુક્રસૂઃ શુક્રરમ્યાઙ્ગી શુક્રાંશુકવિવર્ધિની ॥ ૮૦॥

શુક્રોત્તમા શુક્રપૂજા શુક્રેશી શુક્રવલ્લભા ।
જ્ઞાનેશ્વરી ભગોત્તુઙ્ગા ભગમાલાવિહારિણી ॥ ૮૧॥

ભગલિઙ્ગૈકરસિકા લિઙ્ગિની ભગમાલિની ।
બૈન્દવેશી ભગાકારા ભગલિઙ્ગાદિશુક્રસૂઃ ॥ ૮૨॥

વાત્યાલી વનિતા વાત્યારૂપિણી મેઘમાલિની ।
ગુણાશ્રયા ગુણવતી ગુણગૌરવસુન્દરી ॥ ૮૩॥

પુષ્પતારા મહાપુષ્પા પુષ્ટિઃ પરમલાઘવી ।
સ્વયમ્ભૂપુષ્પસઙ્કાશા સ્વયમ્ભૂપુષ્પપૂજિતા ॥ ૮૪॥

સ્વયમ્ભૂકુસુમન્યાસા સ્વયમ્ભૂકુસુમાર્ચિતા ।
સ્વયમ્ભૂપુષ્પસરસી સ્વયમ્ભૂપુષ્પપુષ્પિણી ॥ ૮૫॥

શુક્રપ્રિયા શુક્રરતા શુક્રમજ્જનતત્પરા ।
અપાનપ્રાણરૂપા ચ વ્યાનોદાનસ્વરૂપિણી ॥ ૮૬॥

પ્રાણદા મદિરા મોદા મધુમત્તા મદોદ્ધતા ।
સર્વાશ્રયા સર્વગુણાઽવ્યવસ્થા સર્વતોમુખી ॥ ૮૭॥

નારીપુષ્પસમપ્રાણા નારીપુષ્પસમુત્સુકા ।
નારીપુષ્પલતા નારી નારીપુષ્પસ્રજાર્ચિતા ॥ ૮૮॥

ષડ્ગુણા ષડ્ગુણાતીતા શશિનઃષોડશીકલા ।
ચતુર્ભુજા દશભુજા અષ્ટાદશભુજા તથા ॥ ૮૯॥

દ્વિભુજા ચૈક ષટ્કોણા ત્રિકોણનિલયાશ્રયા ।
સ્રોતસ્વતી મહાદેવી મહારૌદ્રી દુરન્તકા ॥ ૯૦॥

દીર્ઘનાસા સુનાસા ચ દીર્ઘજિહ્વા ચ મૌલિની ।
સર્વાધારા સર્વમયી સારસી સરલાશ્રયા ॥ ૯૧॥

સહસ્રનયનપ્રાણા સહસ્રાક્ષસમર્ચિતા ।
સહસ્રશીર્ષા સુભટા શુભાક્ષી દક્ષપુત્રિણી ॥ ૯૨॥

ષષ્ટિકા ષષ્ટિચક્રસ્થા ષડ્વર્ગફલદાયિની ।
અદિતિર્દિતિરાત્મા શ્રીરાદ્યા ચાઙ્કુભચક્રિણી ॥ ૯૩॥

ભરણી ભગબિમ્બાક્ષી કૃત્તિકા ચેક્ષ્વસાદિતા ।
ઇનશ્રી રોહિણી ચેષ્ટિઃ ચેષ્ટા મૃગશિરોધરા ॥ ૯૪॥

ઈશ્વરી વાગ્ભવી ચાન્દ્રી પૌલોમી મુનિસેવિતા ।
ઉમા પુનર્જયા જારા ચોષ્મરુન્ધા પુનર્વસુઃ ॥ ૯૫॥

ચારુસ્તુત્યા તિમિસ્થાન્તી જાડિની લિપ્તદેહિની ।
લિઢ્યા શ્લેષ્મતરાશ્લિષ્ટા મઘવાર્ચિતપાદુકી ॥ ૯૬॥

મઘામોઘા તથૈણાક્ષી ઐશ્વર્યપદદાયિની ।
ઐઙ્કારી ચન્દ્રમુકુટા પૂર્વાફાલ્ગુનિકીશ્વરી ॥ ૯૭॥

ઉત્તરાફલ્ગુહસ્તા ચ હસ્તિસેવ્યા સમેક્ષણા ।
ઓજસ્વિની તથોત્સાહા ચિત્રિણી ચિત્રભૂષણા ॥ ૯૮॥

અમ્ભોજનયના સ્વાતિઃ વિશાખા જનની શિખા ।
અકારનિલયાધારા નરસેવ્યા ચ જ્યેષ્ટદા ॥ ૯૯॥

મૂલા પૂર્વાષાઢેશી ચોત્તરાષાઢ્યાવની તુ સા ।
શ્રવણા ધર્મિણી ધર્મ્યા ધનિષ્ઠા ચ શતભિષક્ ॥ ૧૦૦॥

પૂર્વભાદ્રપદસ્થાનાઽપ્યાતુરા ભદ્રપાદિની ।
રેવતીરમણસ્તુત્યા નક્ષત્રેશસમર્ચિતા ॥ ૧૦૧॥

કન્દર્પદર્પિણી દુર્ગા કુરુકુલ્લકપોલિની ।
કેતકીકુસુમસ્નિગ્ધા કેતકીકૃતભૂષણા ॥ ૧૦૨॥

કાલિકા કાલરાત્રિશ્ચ કુટુમ્બજનતર્પિતા ।
કઞ્જપત્રાક્ષિણી કલ્યારોપિણી કાલતોષિતા ॥ ૧૦૩॥

કર્પૂરપૂર્ણવદના કચભારનતાનના ।
કલાનાથકલામૌલિઃ કલા કલિમલાપહા ॥ ૧૦૪॥

કાદમ્બિની કરિગતિઃ કરિચક્રસમર્ચિતા ।
કઞ્જેશ્વરી કૃપારૂપા કરુણામૃતવર્ષિણી ॥ ૧૦૫॥

ખર્બા ખદ્યોતરૂપા ચ ખેટેશી ખડ્ગધારિણી ।
ખદ્યોતચઞ્ચલા કેશી ખેચરી ખેચરાર્ચિતા ॥ ૧૦૬॥

ગદાધારી મહાગુર્વી ગુરુપુત્રા ગુરુપ્રિયા ।
ગીતવાદ્યપ્રિયા ગાથા ગજવક્ત્રપ્રસૂગતિઃ ॥ ૧૦૭॥

ગરિષ્ઠગણપૂજ્યા ચ ગૂઢગુલ્ફા ગજેશ્વરી ।
ગણમાન્યા ગણેશાની ગાણાપત્યફલપ્રદા ॥ ૧૦૮॥

ઘર્માંશુનયના ઘર્મ્યા ઘોરા ઘુર્ઘુરનાદિની ।
ઘટસ્તની ઘટાકારા ઘુસૃણોલ્લસિતસ્તની ॥ ૧૦૯॥

ઘોરારવા ઘોરમુખી ઘોરદૈત્યનિબર્હિણી ।
ઘનચ્છાયા ઘનદ્યુતિઃ ઘનવાહનપૂજિતા ॥ ૧૧૦॥

ટવકોટેશરૂપા ચ ચતુરા ચતુરસ્તની ।
ચતુરાનનપૂજ્યા ચ ચતુર્ભુજસમર્ચિતા ॥ ૧૧૧॥

ચર્મામ્બરા ચરગતિઃ ચતુર્વેદમયી ચલા ।
ચતુઃસમુદ્રશયના ચતુર્દશસુરાર્ચિતા ॥ ૧૧૨॥

ચકોરનયના ચમ્પા ચમ્પાબકુલકુન્તલા ।
ચ્યુતચીરામ્બરા ચારુમૂર્તિશ્ચમ્પકમાલિની ॥ ૧૧૩॥

છાયા છદ્મકરી છિલ્લી છોટિકા છિન્નમસ્તકા ।
છિન્નશીર્ષા છિન્નનાસા છિન્નવસ્ત્રવરૂથિની ॥ ૧૧૪॥

છન્દિપત્રા છન્નછલ્કા છાત્રમન્ત્રાનુગ્રાહિણી ।

છદ્મિની છદ્મનિરતા છદ્મસદ્મનિવાસિની ॥ ૧૧૫॥

છાયાસુતહરા હવ્યા છલરૂપા સમુજ્જ્વલા ।
જયા ચ વિજયા જેયા જયમણ્ડલમણ્ડિતા ॥ ૧૧૬॥

જયનાથપ્રિયા જપ્યા જયદા જયવર્ધિની ।
જ્વાલામુખી મહાજ્વાલા જગત્ત્રાણપરાયણા ॥ ૧૧૭॥

જગદ્ધાત્રી જગદ્ધર્ત્રી જગતામુપકારિણી ।
જાલન્ધરી જયન્તી ચ જમ્ભારાતિવરપ્રદા ॥ ૧૧૮॥

ઝિલ્લી ઝાઙ્કારમુખરા ઝરી ઝઙ્કારિતા તથા ।
ઞનરૂપા મહાઞમી ઞહસ્તા ઞિવલોચના ॥ ૧૧૯॥

ટઙ્કારકારિણી ટીકા ટિકા ટઙ્કાયુધપ્રિયા ।
ઠુકુરાઙ્ગી ઠલાશ્રયા ઠકારત્રયભૂષણા ॥ ૧૨૦॥

ડામરી ડમરૂપ્રાન્તા ડમરૂપ્રહિતોન્મુખી ।
ઢિલી ઢકારવા ચાટા ઢભૂષા ભૂષિતાનના ॥ ૧૨૧॥

ણાન્તા ણવર્ણસમ્યુક્તા ણેયાઽણેયવિનાશિની ।
તુલા ત્ર્યક્ષા ત્રિનયના ત્રિનેત્રવરદાયિની ॥ ૧૨૨॥

તારા તારવયા તુલ્યા તારવર્ણસમન્વિતા ।
ઉગ્રતારા મહાતારા તોતુલાઽતુલવિક્રમા ॥ ૧૨૩॥

ત્રિપુરા ત્રિપુરેશાની ત્રિપુરાન્તકરોહિણી ।
તન્ત્રૈકનિલયા ત્ર્યસ્રા તુષારાંશુકલાધરા ॥ ૧૨૪॥

તપઃ પ્રભાવદા તૃષ્ણા તપસા તાપહારિણી ।
તુષારપરિપૂર્ણાસ્યા તુહિનાદ્રિસુતા તુ સા ॥ ૧૨૫॥

તાલાયુધા તાર્ક્ષ્યવેગા ત્રિકૂટા ત્રિપુરેશ્વરી ।
થકારકણ્ઠનિલયા થાલ્લી થલ્લી થવર્ણજા ॥ ૧૨૬॥

દયાત્મિકા દીનરવા દુઃખદારિદ્ર્યનાશિની ।
દેવેશી દેવજનની દશવિદ્યા દયાશ્રયા ॥ ૧૨૭॥

દ્યુનદી દૈત્યસંહર્ત્રી દૌર્ભાગ્યપદનાશિની ।
દક્ષિણા કાલિકા દક્ષા દક્ષયજ્ઞવિનાશિની ॥ ૧૨૮॥

દાનવા દાનવેન્દ્રાણી દાન્તા દમ્ભવિવર્જિતા ।
દધીચીવરદા દુષ્ટદૈત્યદર્પાપહારિણી ॥ ૧૨૯॥

દીર્ઘનેત્રા દીર્ઘકચા દુષ્ટારપદસંસ્થિતા ।
ધર્મધ્વજા ધર્મમયી ધર્મરાજવરપ્રદા ॥ ૧૩૦॥

ધનેશ્વરી ધનિસ્તુત્યા ધનાધ્યક્ષા ધનાત્મિકા ।
ધીર્ધ્વનિર્ધવલાકારા ધવલામ્ભોજધારિણી ॥ ૧૩૧॥

ધીરસૂર્ધારિણી ધાત્રી પૂઃ પુની ચ પુનીસ્તુ સા ।
નવીના નૂતના નવ્યા નલિનાયતલોચના ॥ ૧૩૨॥

નરનારાયણસ્તુત્યા નાગહારવિભૂષણા ।
નવેન્દુસન્નિભા નામ્ના નાગકેસરમાલિની ॥ ૧૩૩॥

નૃવન્દ્યા નગરેશાની નાયિકા નાયકેશ્વરી ।
નિરક્ષરા નિરાલમ્બા નિર્લોભા નિરયોનિજા ॥ ૧૩૪॥

નન્દજાઽનઙ્ગદર્પાઢ્યા નિકન્દા નરમુણ્ડિની ।
નિન્દાઽઽનિન્દફલા નિષ્ઠા નન્દકર્મપરાયણા ॥ ૧૩૫॥

નરનારીગુણપ્રીતા નરમાલાવિભૂષણા ।
પુષ્પાયુધા પુષ્પમાલા પુષ્પબાણા પ્રિયંવદા ॥ ૧૩૬॥

પુષ્પબાણપ્રિયઙ્કરી પુષ્પધામવિભૂષિતા ।
પુણ્યદા પૂર્ણિમા પૂતા પુણ્યકોટિફલપ્રદા ॥ ૧૩૭॥

પુરાણાગમમન્ત્રાઢ્યા પુરાણપુરુષાકૃતિઃ ।
પુરાણગોચરા પૂર્વા પરબ્રહ્મસ્વરૂપિણી ॥ ૧૩૮॥

પરાપરરહસ્યાઙ્ગા પ્રહ્લાદપરમેશ્વરી ।
ફાલ્ગુની ફાલ્ગુણપ્રીતા ફણિરાજસમર્ચિતા ॥ ૧૩૯॥

ફણપ્રદા ફણેશી ચ ફણાકારા ફલોત્તમા ।
ફણિહારા ફણિગતિઃ ફણિકાઞ્ચી ફલાશના ॥ ૧૪૦॥

બલદા બાલ્યરૂપા ચ બાલરાક્ષરમન્ત્રિતા ।
બ્રહ્મજ્ઞાનમયી બ્રહ્મવાઞ્છા બ્રહ્મપદપ્રદા ॥ ૧૪૧॥

બ્રહ્માણી બૃહતિર્વ્રીડા બ્રહ્માવર્તપ્રવર્તની ।
બ્રહ્મરૂપા પરાવ્રજ્યા બ્રહ્મમુણ્ડૈકમાલિની ॥ ૧૪૨॥

બિન્દુભૂષા બિન્દુમાતા બિમ્બોષ્ઠી બગુલામુખી ।
બ્રહ્માસ્ત્રવિદ્યા બ્રહ્માણી બ્રહ્માડચ્યુતનમસ્કૃતા ॥ ૧૪૩॥

ભદ્રકાલી સદાભદ્રી ભીમેશી ભુવનેશ્વરી ।
ભૈરવાકારકલ્લોલા ભૈરવી ભૈરવાર્ચિતા ॥ ૧૪૪॥

ભાનવી ભાસુદામ્ભોજા ભાસુદાસ્યભયાર્તિહા ।
ભીડા ભાગીરથી ભદ્રા સુભદ્રા ભદ્રવર્ધિની ॥ ૧૪૫॥

મહામાયા મહાશાન્તા માતઙ્ગી મીનતર્પિતા ।
મોદકાહારસન્તુષ્ટા માલિની માનવર્ધિની ॥ ૧૪૬॥

મનોજ્ઞા શષ્કુલીકર્ણા માયિની મધુરાક્ષરા ।
માયાબીજવતી માની મારીભયનિસૂદિની ॥ ૧૪૭॥

માધવી મન્દગા માધ્વી મદિરારુણલોચના ।
મહોત્સાહા ગણોપેતા માનનીયા મહર્ષિભિઃ ॥ ૧૪૮॥

મત્તમાતઙ્ગા ગોમત્તા મન્મથારિવરપ્રદા ।
મયૂરકેતુજનની મન્ત્રરાજવિભૂષિતા ॥ ૧૪૯॥

યક્ષિણી યોગિની યોગ્યા યાજ્ઞિકી યોગવલ્લભા ।
યશોવતી યશોધાત્રી યક્ષભૂતદયાપરા ॥ ૧૫૦॥

યમસ્વસા યમઘ્ની ચ યજમાનવરપ્રદા ।
રાત્રી રાત્રિઞ્ચરઘ્ની ચ રાક્ષસી રસિકા રસા ॥ ૧૫૧॥

રજોવતી રતિઃ શાન્તી રાજમાતઙ્ગિની પરા ।
રાજરાજેશ્વરી રાજ્ઞી રસાસ્વાદવિચક્ષણા ॥ ૧૫૨॥

લલના નૂતનાકારા લક્ષ્મીનાથસમર્ચિતા ।
લક્ષ્મીશ્ચ સિદ્ધલક્ષ્મીશ્ચ મહાલક્ષ્મી લલદ્રસા ॥ ૧૫૩॥

લવઙ્ગકુસુમપ્રીતા લવઙ્ગફલતોષિતા ।
લાક્ષારુણા લલત્યા ચ લાઙ્ગૂલી વરદયિની ॥ ૧૫૪॥

વાતાત્મજપ્રિયા વીર્યા વરદા વાનરેશ્વરી ।
વિજ્ઞાનકારિણી વેણ્યા વરદા વરદેશ્વરી ॥ ૧૫૫॥

વિદ્યાવતી વૈદ્યમાતા વિદ્યાહારવિભૂષણા ।

વિષ્ણુવક્ષસ્થલસ્થા ચ વામદેવાઙ્ગવાસિની ॥ ૧૫૬॥

વામાચારપ્રિયા વલ્લી વિવસ્વત્સોમદાયિની ।
શારદા શારદામ્ભોજવારિણી શૂલધારિણી ॥ ૧૫૭॥

શશાઙ્કમુકુટા શષ્પા શેષશાયીનમસ્કૃતા ।
શ્યામા શ્યામામ્બરા શ્યામમુખી શ્રીપતિસેવિતા ॥ ૧૫૮॥

ષોડશી ષડ્રસા ષડ્જા ષડાનનપ્રિયઙ્કરી ।
ષડઙ્ઘ્રિકૂજિતા ષષ્ટિઃ ષોડશામ્બરપૂજિતા ॥ ૧૫૯॥

ષોડશારાબ્જનિલયા ષોડશી ષોડશાક્ષરી ।
સૌમ્બીજમણ્ડિતા સર્વા સર્વગા સર્વરૂપિણી ॥ ૧૬૦॥

સમસ્તનરકત્રાતા સમસ્તદુરિતાપહા ।
સમ્પત્કરી મહાસમ્પત્ સર્વદા સર્વતોમુખી ॥ ૧૬૧॥

સૂક્ષ્માકરી સતી સીતા સમસ્તભુવનાશ્રયા ।
સર્વસંસ્કારસમ્પત્તિઃ સર્વસંસ્કારવાસના ॥ ૧૬૨॥

હરિપ્રિયા હરિસ્તુત્યા હરિવાહા હરીશ્વરી ।
હાલાપ્રિયા હલિમુખી હાટકેશી હૃદેશ્વરી ॥ ૧૬૩॥

હ્રીંબીજવર્ણમુકુટા હ્રીં હરપ્રિયકારિણી ।
ક્ષમા ક્ષાન્તા ચ ક્ષોણી ચ ક્ષત્રિયી મન્ત્રરૂપિણી ॥ ૧૬૪॥

પઞ્ચાત્મિકા પઞ્ચવર્ણા પઞ્ચતિગ્મસુભેદિની ।
મુક્તિદા મુનિવૃન્દેશી શાણ્ડિલ્યવરદાયિની ॥ ૧૬૫॥

ૐ હ્રીં ઐં હ્રીં ચ પઞ્ચાર્ણદેવતા શ્રીસરસ્વતી ।
ૐ સૌં હ્રીં શ્રીં શરદ્બીજશીર્ષા નીલસરસ્વતી ॥ ૧૬૬॥

ૐ હ્રીં ક્લીં સઃ નમો હ્રીં હ્રીં સ્વાહા બીજા ચ શારદા ॥ ૧૬૭॥

॥ ફલશ્રુતિઃ ॥

શારદાનામસાહસ્રમન્ત્રં શ્રીભૈરવોદિતમ્ ।
ગુહ્યં મન્ત્રાત્મકં પુણ્યં સર્વસ્વં ત્રિદિવૌકસામ્ ॥ ૧॥

યઃ પઠેત્પાઠયેદ્વાપિ શૃણુયાચ્છ્રાવયેદપિ ।
દિવા રાત્રૌ ચ સન્ધ્યાયાં પ્રભાતે ચ સદા પુમાન્ ॥ ૨॥

ગોગજાશ્વરથૈઃ પૂર્ણં ગેહં તસ્ય ભવિષ્યતિ ।
દાસી દાસજનૈઃ પૂર્ણં પુત્રપૌત્રસમાકુલમ્ ॥ ૩॥

શ્રેયસ્કરં સદા દેવી સાધકાનાં યશસ્કરમ્ ।
પઠેન્નામસહસ્રં તુ નિશીથે સાધકોત્તમઃ ॥ ૪॥

સર્વરોગપ્રશમનં સર્વદુઃખનિવારણમ્ ।
પાપરોગાદિદુષ્ટાનાં સઞ્જીવનિફલપ્રદમ્ ॥ ૫॥

યઃ પઠેદ્ભક્તિયુક્તસ્તુ મુક્તકેશો દિગમ્બરઃ ।
સર્વાગમે સઃ પૂજ્યઃ સ્યાત્સવિષ્ણુઃ સમહેશ્વરઃ ॥ ૬॥

બૃહસ્પતિસમો વાચિ નીત્યા શઙ્કરસન્નિભઃ ।
ગત્યા પવનસઙ્કાશો મત્યા શુક્રસમોઽપિ ચ ।
તેજસા દિવ્યસઙ્કાશો રૂપેણ મકરધ્વજઃ ॥ ૭॥

જ્ઞાનેન ચ શુકો દેવિ ચાયુષા ભૃગુનન્દનઃ ।
સાક્ષાત્ સ પરમેશાનિ પ્રભુત્વેન સુરાધિપઃ ॥ ૮॥

વિદ્યાધિષણયા કીર્ત્યા રામો રામો બલેન ચ ।
સ દીર્ઘાયુઃ સુખી પુત્રી વિજયી વિભવી વિભુઃ ॥ ૯॥

નાન્યચિન્તા પ્રકર્તવ્યા નાન્યચિન્તા કદાચન ॥ ૧૦॥

વાતસ્તમ્ભં જલસ્તમ્ભં ચૌરસ્તમ્ભં મહેશ્વરિ ।
વહ્નિશૈત્યં કરોત્યેવ પઠનં ચાસ્ય સુન્દરિ ॥ ૧૧॥

સ્તમ્ભયેદપિ બ્રહ્માણં મોહયદપિ શઙ્કરમ્ ।
વશ્યયેદપિ રાજાનં શમયેદ્ધવ્યવાહનમ્ ॥ ૧૨॥

આકર્ષયેદ્દેવકન્યાં ઉચ્ચાટયતિ વૈરિણમ્ ।
મારયેદપકીર્તિં ચ સંવશ્યેચ્ચ ચતુર્ભુજમ્ ॥ ૧૩॥

કિં કિં ન સાધયેદેવં મન્ત્રનામસહસ્રકમ્ ।
શરત્કાલે નિશીથે ચ ભૌમે શક્તિસમન્વિતઃ ॥ ૧૪॥

પઠેન્નામસહસ્રં ચ સાધકઃ કિં ન સાધયેત્ ।
અષ્ટમ્યામાશ્વમાસે તુ મધ્યાહ્ને મૂર્તિસન્નિધૌ ॥ ૧૫॥

પઠેન્નામસહસ્રં તુ મુક્તકેશો દિગમ્બરઃ ।
સુદર્શનો ભવેદાશુ સાધકઃપર્વતાત્મજે ॥ ૧૬॥

અષ્ટમ્યાં સર્વરાત્રં તુ કુઙ્કુમેન ચ ચન્દનૈઃ ।
રક્તચન્દનયુક્તેન કસ્તૂર્યા ચાપિ પાવકૈઃ ॥ ૧૭॥

મૃગનાભિર્મનઃશિલાકલ્કયુક્તેનવારિણા ।
લિખેદ્ભૂર્જે જપેન્મન્ત્રં સાધકો ભક્તિપૂર્વકમ્ ॥ ૧૮॥

ધારયેન્મૂર્ધ્નિ વા બાહૌ યોષિદ્વામકરે શિવે ।
રણે રિપૂન્વિજિત્યાશુ માતઙ્ગાનિવ કેસરી ॥ ૧૯॥

સ્વગૃહં ક્ષણમાયાતિ કલ્યાણિ સાધકોત્તમઃ ।
વન્ધ્યા વામભુજે ધૃત્વા ચતુર્થેઽહનિ પાર્વતિ ॥ ૨૦॥

અમાયાં રવિવારે યઃ પઠેત્પ્રેતાલયે તથા ।
ત્રિવારં સાધકો દેવિ ભવેત્ સ તુ કવીશ્વરઃ ॥ ૨૧॥

સઙ્ક્રાન્તૌ ગ્રહણે વાપિ પઠેન્મન્ત્રં નદીતટે ।
સ ભવેત્સર્વશાસ્ત્રજ્ઞો વેદવેદાઙ્ગતત્ત્વવિત્ ॥ ૨૨॥

શારદાયા ઇદં નામ્નાં સહસ્રં મન્ત્રગર્ભકમ્ ।
ગોપ્યં ગુહ્યં સદા ગોપ્યં સર્વધર્મૈકસાધનમ્ ॥ ૨૩॥

મન્ત્રકોટિમયં દિવ્યં તેજોરૂપં પરાત્પરમ્ ।
અષ્ટમ્યાં ચ નવમ્યાં ચ ચતુર્દશ્યાં દિને દિને ॥ ૨૪॥

સઙ્ક્રાન્તે મઙ્ગલૌ રાત્ર્યાં યોઽર્ચયેચ્છારદાં સુધીઃ ।
ત્રયસ્ત્રિંશત્સુકોટીનાં દેવાનાં તુ મહેશ્વરિ ॥ ૨૫॥

ઈશ્વરી શારદા તસ્ય માતેવ હિતકારિણી ।
યો જપેત્પઠતે નામ્નાં સહસ્રં મનસા શિવે ॥ ૨૬॥

સ ભવેચ્છારદાપુત્રઃ સાક્ષાદ્ભૈરવસન્નિભઃ ।
ઇદં નામ્નાં સહસ્રં તુ કથિતં હિતકામ્યયા ॥ ૨૭॥

અસ્ય પ્રભાવમતુલં જન્મજન્માન્તરેષ્વપિ ।
ન શક્યતે મયાઽઽખ્યાતું કોટિશો વદનૈરપિ ॥ ૨૮॥

અદાતવ્યમિદં દેવિ દુષ્ટાનામતિભાષિણામ્ ।
અકુલીનાય દુષ્ટાય દીક્ષાહીનાય સુન્દરિ ॥ ૨૯॥

અવક્તવ્યમશ્રોતવ્યમિદં નામસહસ્રકમ્ ।

અભક્તેભ્યોઽપિ પુત્રેભ્યો ન દાતવ્યં કદાચન ॥ ૩૦॥

શાન્તાય ગુરુભક્તાય કુલીનાય મહેશ્વરિ ।
સ્વશિષ્યાય પ્રદાતવ્યં ઇત્યાજ્ઞા પરમેશ્વરિ ॥ ૩૧॥

ઇદં રહસ્યં પરમં દેવિ ભક્ત્યા મયોદિતમ્ ।
ગોપ્યં રહસ્યં ચ ગોપ્તવ્યં ગોપનીયં સ્વયોનિવત્ ॥ ૩૨॥

॥ ઇતિ શ્રીરુદ્રયામલતન્ત્રે પાર્વતીપરમેશ્વરસંવાદે
શ્રીશારદાસહસ્રનામસ્તવરાજઃ સમ્પૂર્ણઃ ॥

Proofread by PSA Easwaran

*Shri Sharada Sahasranama Stotram*
pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*